प्रयोग

संस्कृत

क्र.नं. १३२

१ भूतशुद्धि ॥

पत्रांक

३३०८

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीगणेशायनमः। अथभूतशुद्धिः। पृथ्वियामेरूपृष्ठऋषिकुर्मेपृष्ठोदेवता।सुतलंछंदः॥
आसनेविनियोगाः। कुर्मासनायनमः। योगासनायनमः। विमलासनायनमः।
मध्येपरमसुखासनायनमः। पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृ
ता। त्वंचधारयमांदेविपवित्रंकुरुचासनं। आसनेउपविश्य। अपसर्पंतुये
भूतायेभूताभुमिसंस्थिताः। येभूताविघ्नकर्तारःस्तेनश्यंतुशिवाज्ञया॥
अपक्रामंतुभूतानिपिशाचाः सर्वतोदिशं। सर्वेषामविरोधेनब्रह्मकर्म
समारभेत्॥ तीक्ष्णदंष्ट्रमहाकायाकल्पांतदहनोपम॥ भैरवायनम
स्तुभ्यंमनुज्ञांदातुमर्हसि॥ वामपादेभूमौआघातत्रयंकुर्यात्॥ ब्रह्म
केंद्रसमुद्भूतंज्ञाननालंसुशोभितं॥ ऐश्वर्याष्टदलोपेतंपरंवैराग्यकर्णिकं। अधो

मुखंतु हृत्सरोजं प्रणवेनोर्ध्वमुन्नयेत् ॥ ओं प्रणवेन विकसितं कृत्वा तत्रस्थं जी
वात्मानं सोहं समात्रेण कुंडलामुद्रया तु ॥ सुषुम्नानाडिमार्गेण ब्रह्मरंध्रं नी
त्वा ॥ तत्रस्थ सहस्रदलपद्मकर्णिकांतर्गतेन परमात्मना सहैक्यभावमा
पादयेत् । ब्रह्महत्या शिरस्कं च स्वर्णस्ते… जद्वयं ॥ सुरापानहृदायुक्तं गुरुतल्पक
टिद्वयं । तत्संसर्गीपदद्वंद्वं मंगप्रत्यंगपातकं उपपातकरोमाणं रक्तश्मश्रुविलोच
नं ॥ अधोमुखं कृष्णवर्णं मंगुष्ठप…रिमाणकं । खड्गचर्मधरं पापं वाम कुक्षौ विचि
तयेत् । इति पापपुरुषं संचिंत्य । पू… वायुबीजेन चतुःषष्टिसंख्या रमित्य
ग्निबीजेन संदाह्य पुनर्यं इति वायुबीज द्वात्रिंशत्संख्यातं दक्षिणनासा
पुटेन बहिर्निसार्य । वं इत्यमृतबीजेन षोडशवारं जपेत् तेनामृती कृत्वा ॥ नु

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2अ)

नशुधिंकुर्यात्।पादादिजानुपर्यंतंपृथ्वी।विस्थानंचतुरस्रंचतुर्दिक्षुवज्रलांछितंतन्म
ध्येपीतवर्णंलंबीजयुक्तंध्यायेत्।स्योनापृथिवीभवान्नृक्षरानिवेशनी।यच्छा
नःशर्मसप्रथाः॥लंभूम्यैनमः॥जान्वादिनाभिपर्यंतंअपांस्थानंधनुराका
मुभयोकोद्योश्वेतपद्मलांछितं।तन्मध्येश्वेतवर्णंवंबीजयुक्तंध्यायेत्।अप्सुमेसोमोअब्रवी
दंतर्विश्वानिभेषजा।अग्निंचविश्वशंभुवमापश्चविश्वभेषजीः।वंअद्भ्योनमः।नाभ्यादि
हृदयपर्यंतंअग्निस्थानं।त्रिकोणंस्वस्तिकलांछितं।तन्मध्येरक्तवर्णंरंबीजयुक्तंध्याये
त्।अग्निदूतंवृणीमहेहोतारंविश्ववेदसं।अस्ययज्ञस्यसुक्रतुं।रंअग्नयेनमः।हृद
यादिभ्रूमध्यपर्यंतं।वायुस्थानं।षट्कोणंषड्बिंदुलांछितं।तन्मध्येधूम्रवर्णंयंबीज
युक्तंध्यायेत्।वायोशतंहरीणांयुवस्वपोष्याणां।उतवातेसहस्रिणोरथआयातु

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

२

(3)

पाजसा ॥ यं वायवे नमः भ्रूमध्यादिब्रह्मरंध्रपर्यंतं आकाशस्थानं वर्तुलाकारं धवलं लांछितं
तन्मध्ये नीलवर्णं हंबीजयुक्तं ध्यायेत् । आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यंति वासरं । परो
यदिध्यते दिवा । हं आकाशाय नमः । पृथ्वीं पंचगुणां तद्बीजेन षडुद्घातप्रयोगेणाप्सु
प्रविलापयामि । लं चतुर्गुणा आपः तद्बीजेन चतुरुद्घातप्रयोगेण । वायौ प्रविलाप
यामि । रं ४ द्विगुणं वायुं तद्बीजेन त्रिरुद्घातप्रयोगेणाकाशे प्रविलापयामि । यं २ एक
गुणमाकाशं तद्बीजेन द्विरुद्घातप्रयोगेणाहंकारे प्रविलापयामि । हं हं तमहंकारं म
हत्तत्त्वे प्रविलापयामि । तन्महत्तत्त्वं प्रकृतौ प्रविलापयामि । तां प्रकृतीं परब्रह्मणि प्रविला
पयामि । इति प्रविलाप्य । शुद्धोहं मुक्तोहं सच्चिदानंदरूपोहं ब्रह्माहमस्मीति चिरं भा
वयेत् ॥ तस्मात्सर्वज्ञा सर्वशक्तेः । परब्रह्मणः । सकाशात्प्रकृतिः । प्रकृतेर्महा

(3A)

त्रामनोहंकारः।अहंकारादाकाशः। आकाशः।अग्नेरेतः।रेतसः पुरुषः।इतिसृष्टिः।पुनर्जीवात्म
नंसोहमितिमंत्रेणांकुशमुद्रयासुषुम्नानाडिमार्गेणायतत्रप्रतिष्ठापयेत्।इतिभूतशु
द्धिः।अथप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुमहेश्वराऋषयः।ऋग्यजुःसामाथर्वाणि
छंदांसी।पराप्राणशक्तिर्देवता।आंबीजं।ह्रींशक्तिः।क्रोंमकिलकं।प्राणप्रतिष्ठा
पनेविनियोगः।ॐआंह्रींक्रोंॐअंकंखंगंघंङं।आंक्रोंह्रींआंपृथिव्यप्तेजोवायु
राकाशात्मनेअंगुष्ठाभ्यांनमः।ॐआंह्रींक्रोंओंइंचंछंजंझंञंईंक्रोंह्रींआंशब्दस्प
र्शरूपरसगंधात्मनेतर्जनीभ्यांनमः।ॐआंह्रींक्रोंअंउंटंठंडंढंणंऊंक्रोंह्रींआं
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेमध्यमाभ्यांनमः।ॐआंह्रींक्रोंॐएंतंथंदं
धंनंऐंक्रोंह्रींआंवाक्पाणिपादपायूपस्थात्मनेअनामिकाभ्यांनमः।ॐआं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com